# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – नवम्बर-दिसम्बर, २०१६

कक्षा – शास्त्रिप्रथमवर्षम् (SEM-1) **प्रश्नपत्रम् – ५** गुणाः - ७०

विषयः – स्वामिनारायणवेदान्तः (J) **कोड – CC-1.1.1** समयः – ०३ तः ०६ पर्यन्तम्

दिनाङ्कः – ०९/१२/२०१६ सन्दर्भग्रन्थः – यतीन्द्रमतदीपिका (१-४ अवताराः)

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – १ निम्नलिखितेषु द्वयोः उत्तरं लिखत।** ०८

(१) यतीन्द्रमतदीपिकायाः मङ्गलश्लोकस्य व्याख्यां लिखत।

(२) यथाग्रन्थं सत्ख्यातिवादस्य व्याख्यां कुरुत।

(३) ग्रन्थोक्तदिशा पञ्चधा ईश्वरस्य वर्णनं लिखत।

**प्रश्नः – २ निम्नलिखितयोः कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत।** ०८

(१) प्रत्यक्षप्रमायाः लक्षणं विलिख्य प्रत्यक्षज्ञानस्य प्रक्रियां प्रदर्शयत

(२) अनुमानप्रमाणस्य उपरि एकं निबन्धं निबन्धयत।

**प्रश्नः – ३ निम्नलिखितेषु द्वयोः उपरि टिप्पणीं लिखत।** ०४

(१) विशिष्टाद्वैतपदस्य अर्थः कः?

(२) पदार्थभेदाः

(३) लक्षणस्य त्रयो दोषाः।

(४) स्मृतिनिरूपणम्।

**प्रश्नः – ४ अधोलिखितेषु केषाञ्चन पञ्चानाम् अतिलघूत्तरं लिखत।** ०५

(१) व्याप्यस्य कति रूपाणि ?

(२) यतीन्द्रमतदीपिकाकारः कः ?

(३) यतीन्द्रमतदीपिकायां कति अवताराः सन्ति?

(४) किं नाम प्रमाणम् ?

(५) किं नाम प्रमा ?

(६) चैतन्यं कतिविधम् ?

(७) व्याप्तिः कतिविधा? किं तत्?

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ५ निम्नलिखितेषु द्वयोरुत्तरं लिखत।** ०८

(१) यथाग्रन्थं शब्दप्रमाणं चर्चयत

(२) वेदाङ्गानां समासेन परिचयं लिखत।

(३) पुराणागमादीनां प्रामाण्यविमर्शम् उपपादयत

**प्रश्नः – ६ निम्नलिखितयोः कस्यचिद् एकस्य समीक्षात्मकम् उत्तरंलिखत।** ०८

(१) समग्रस्यापि वेदवाक्यस्य प्रामाण्यविचारं समीक्षयत।

(२) वेदवाक्यानां पौरुषेयापौरुषेयत्वविचारं स्पष्टयत

**प्रश्नः – ७ निम्नलिखितेषु द्वयोः उपरि लघुटिप्पणीं लिख्यताम्।** ०२

(१) पौरुषेयवाक्यम्।

(२) विधिविचारः।

**प्रश्नः – ८ अधोनिर्दिष्टेषु कयोश्चिद् द्वयोः अतिलघूत्तरं यच्छत।** ०२

(१) किं नाम शाब्दज्ञानम् ?

(२) सर्गादौ भगवान् कस्मै वेदम् उपदिशति?

(३) वेदः नित्यः उत अनित्यः?

(४) वेदस्य पूर्वकाण्डं किम्?

## तृतीयान्वितिः (Unit-3)

**प्रश्नः – ९ निम्नलिखितेषु द्वयोः उत्तरं दीयताम्।** ०८

(१) प्रमेयस्य द्वैविध्यं ग्रन्थोक्तदिशा विशदयत।

(२) पञ्चमहाभूतेषु आकाशस्य निरूपणं कुरुत।

(३) शरीरलक्षणं विलिख्य तस्य प्रभेदान् लिखत

**प्रश्नः – १० निम्नलिखितयोः कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत।** ०८

(१) यथाग्रन्थम् इन्द्रियनिरूपणं कुरुत।

(४) पञ्चीकरणप्रक्रियां स्पष्टयत।

**प्रश्नः – ११ निम्नलिखितेषु द्वयोः उत्तरं दीयताम्** ०४

(१) द्रव्यम्।

(२) इन्द्रियाणि।

(३) प्रकृतिः।

(४) तन्त्रमात्राणि।

**प्रश्नः – १२ अधोनिर्दिष्टेषु पञ्चानाम् अतिलघूत्तरं यच्छत** ०५

(१) द्रव्यं कतिविधम्?

(२) अहङ्कारः कतिविधः?

(३) ज्ञानेन्द्रियं कतिविधम्?

(४) कति भूतानि सन्ति?

(५) स्पर्शतन्मात्रं कस्माद् उत्पद्यते?

(६) तेजः कतिविधम्?

(७) शरीरं कतिविधम्?

***

# <u>Answer Key</u>

कक्षा – शास्त्रिप्रथमवर्षम् (SEM-1) **प्रश्नपत्रम् – ५** गुणाः - ७०

विषयः – स्वामिनारायणवेदान्तः (J) **कोड – CC-1.1.1** समयः – ०३ तः ०६ पर्यन्तम्

दिनाङ्कः – ०९/१२/२०१६ सन्दर्भग्रन्थः – यतीन्द्रमतदीपिका (१-४ अवताराः)

## प्रथमान्वितिः (Unit-1)

**प्रश्नः – ३**

१. द्वयोर्भावो द्विता। द्वितैव द्वैतम्। न द्वैतम् अद्वैतम्। विशिष्टञ्चेदमद्वैतं विशिष्टाद्वैतम्।
२. पदार्थजातं द्विविधम् – प्रमाणप्रमेयभेदेन।
३. अव्याप्तिरतिव्याप्तिरसम्भवश्चेति।
४. पूर्वानुभवजन्यसंस्कारमात्रजन्यं ज्ञानं स्मृतिः

**प्रश्नः – ४**

१. द्वे रूपे – अनुमित्यङ्गभूते व्याप्तिः पक्षधर्मता चेति
२. श्रीनिवासाचार्यः।
३. दश
४. प्रमाकरणं प्रमाणम्।
५. यथावस्थितव्यवहारानुगुणं ज्ञानम्।
६. त्रिविधम् – अन्तःकरणावच्छिन्नचैतन्यं, वृत्त्यवच्छिन्नचैतन्यं, विषयावच्छिन्नचैतन्यञ्च।
७. द्विविधा – अन्वयव्यतिरेकभेदात्।

## द्वितीयान्वितिः (Unit-2)

**प्रश्नः – ७**

१. पुरुषस्वातन्त्र्याधीनरचनाविशेषविशिष्टं पौरुषेयम्
२. हितानुशासनरूपं वाक्यमिह विधिः। सः त्रिविधः – अपूर्वपरिसङ्ख्यानियमभेदात्

**प्रश्नः – ८**

१. अनाप्तानुक्तवाक्यजनिततदर्थ विज्ञानं शाब्दज्ञानम्
२. चतुर्मुखाय।
३. नित्यः
४. आराधनकर्मप्रतिपादकं पूर्वकाण्डम्

## तृतीयान्वितिः (Unit-3)

**प्रश्नः – ११**

१. उपादानं द्रव्यम्।अवस्थाश्रय उपादानम्।
२. सात्त्विकाहङ्कारोपादानकं द्रव्यमिन्द्रियम्। तद्विविधम् – ज्ञानेन्द्रियकर्मेन्द्रियभेदात्।
३. सत्त्वरजस्तमोरूपगुणत्रयाश्रयारूपा प्रकृतिः।
४. पञ्चतन्त्रमात्राणि।

**प्रश्नः – १२**

१. षड्विधम् – प्रकृतिकालशुद्धसत्त्वधर्मभूतज्ञानजीवेश्वरभेदात्
२. त्रिविधः
३. षड्विधम्।
४. पञ्च
५. आकाशात्।
६. चतुर्विधम्।
७. द्विविधम् – नित्यमित्यमिति भेदात्।